শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।

ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৪৫

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

श्रीः
श्रीमते कृष्णाय परब्रह्मणे नमः
श्रीमते रामानुजाय नमः

# ॥श्रीमन्नारायणीयम् ॥

## दशक - ४५

*बालक्रीडावर्णनम्*

অযি সবল মুরারে পাণিজানুপ্রচারৈঃ
    কিমপি ভৱনভাগান্ ভূষযন্তৌ ভৱন্তৌ।
চলিতচরণকঞ্জৌ মঞ্জুমঞ্জীরশিঞ্জা-
    শ্রৱণকুতুকভাজৌ চেরতুশ্চারুৱেগাত্॥ ১ ॥

মৃদু মৃদু ৱিহসন্তাৱুন্মিষদ্দন্তৱন্তৌ
    ৱদনপতিতকেশৌ দৃশ্যপাদাব্জদেশৌ।
ভুজগলিতকরান্তৱ্যালগত্ কঙ্কণাঙ্কৌ
    মতিমহরতমুচ্চৈঃ পশ্যতাং ৱিশ্বনৃণাম্॥ ২ ॥

অনুসরতি জনৌঘে কৌতুকৱ্যাকুলাক্ষে
    কিমপি কৃতনিনাদং ৱ্যাহসন্তৌ দ্রৱন্তৌ।
ৱলিতৱদনপদ্মং পৃষ্ঠতো দত্তদৃষ্টী
    কিমিৱ ন ৱিদধাথে কৌতুকং ৱাসুদেৱ॥ ৩ ॥

দ্রুতগতিষু পতন্তাৱুত্থিতৌ লিপ্তপঙ্কৌ
    দিৱি মুনিভিরপঙ্কৈঃ সস্মিতং ৱন্দ্যমানৌ।
দ্রুতমথ জননীভ্যাং সানুকম্পং গৃহীতৌ
    মুহুরপি পরিরব্ধৌ দ্রাগ্যুৱাং চুম্বিতৌ চ॥ ৪ ॥

স্নুতকুচভরমঙ্কে ধারযন্তী ভৱন্তং
    তরলমতি যশোদা স্তন্যদা ধন্যধন্যা।
কপটপশুপ মধ্যে মুগ্ধহাসাঙ্কুরং তে
    দশনমুকুলহৃদ্যং ৱীক্ষ্য ৱক্ত্রং জহর্ষ॥ ৫ ॥

www.prapatti.com

তদনু চরণচারী দারকৈস্সাকমারা-
  ন্নিলযততিষু খেলন্ বালচাপল্যশালী।
ভৱনশুকৱিলালান্ ৱতসকাংশ্চানুধাৱন
  কথমপি কৃতহাসৈর্গোপকৈর্ৱারিতোভূঃ॥ ৬ ॥

হলধরসহিতস্তৱং যত্র যত্রোপযাতো
  ৱিৱশপতিতনেত্রাস্তত্র তত্রৈৱ গোপ্যঃ।
ৱিগলিতগৃহকৃত্যা ৱিস্মৃতাপত্যভৃত্যা
  মুরহর মুহুরত্যন্তাকুলা নিত্যমাসন্॥ ৭ ॥

প্রতিনৱনৱনীতং গোপিকাদত্তমিচ্ছন
  কলপদমুপগাযন্ কোমলং ক্বাপি নৃত্যন্।
সদযযুৱতিলোকৈরর্পিতং সর্পিরশ্নন
  ক্বচন নৱৱিপক্বং দুগ্ধমপ্যাপিবস্তৱম্॥ ৮ ॥

মম খলু বলিগেহে যাচনং জাতমাস্তা-
  মিহ পুনরবলানামগ্রতো নৈৱ কুর্ৱে।
ইতি ৱিহিতমতিঃ কিং দেৱ সন্ত্যজ্য যাচ্ঞাং
  দধিঘৃতমহরস্তৱং চারুণা চোরণেন॥ ৯ ॥

তৱ দধিঘৃতমোষে ঘোষযোষাজনানা-
  মভজত হৃদি রোষো নাৱকাশং ন শোকঃ।
হৃদযমপি মুষিত্বা হর্ষসিন্ধৌ ন্যধাস্তৱং
  স মম শমায রোগান্ ৱাতগেহাধিনাথ॥ ১০ ॥

**********

শাখাগ্রেথ ৱিধুং ৱিলোক্য ফলমিত্যম্বাং চ তাতং মুহুঃ
  সম্প্রার্থ্যাথ তদা তদীয ৱচসা প্রোতক্ষিপ্ত বাহৌ ত্বযি।
চিত্রং দেৱ শশী স তে করমগাত্ কিং ব্রূমহে সম্পত-
  জ্জ্যোতির্মণ্ডলপূরিতাখিলৱপুঃ প্রাগা ৱিরাডরূপতাম্॥ ১১ ॥

কিং কিং বতেদমিতি সম্ভ্রম ভাজমেনং
  ব্রহ্মার্ণৱে ক্ষণমমুং পরিমজ্জ্য তাতম্।

মায়াং পুনস্তনয়মোহময়ীং ৱিতন্ব-
ন্নানন্দচিন্ময় জগন্ময় পাহি ৰোগাত্॥ ১২ ॥

**********

www.prapatti.com